॥ શ્રી ॥
અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ
॥ શ્રી મધ્વવિજયઃ ॥

૧૫. પંચદશઃ સર્ગઃ

ભૂયોબોધસ્તતો ભૂયો વ્યાચખ્યૌ ભાષ્યમદ્ભુતમ ।
ગ્રામે ગ્રામીણસામાન્યે વસંસ્તત્રામરાલયે ॥ ૧૫.૧ ॥

પરપક્ષરથારૂઢં ખરતર્કમહાયુધમ ।
ત્રિવિક્રમાર્ય સોઽપશ્યત પ્રતિવીરમિવાગ્રતઃ ॥ ૧૫.૨ ॥

તદા તદાનનાંભોજાદ વૃત્તોપન્યાસભારતી ।
સેના સેનાગ્રહા દિવ્યા શિબિરાદિવ નિર્યયૌ ॥ ૧૫.૩ ॥

નાત્યત્વરા નાતિરયા ન સ્ખલંતી નિરંતરા ।
અનાનાવયવેત્યેવ દવીયોભિઃ પ્રતર્કિતા ॥ ૧૫.૪ ॥

સૂત્રસ્યંદનવૃંદાઢ્યા દુર્વારશ્રુતિવારણા ।
સૂપપત્તિમહાપત્તિર્વિચિત્રસ્મૃતિસપ્તિકા ॥ ૧૫.૫ ॥

વર્ધિતોર્મિહરિપ્રેષ્ઠાસુપયોધરસુસ્વરા ।
સવિતાનપ્રકાશાર્થા સાગરી શ્રીરિવાપરા ॥ ૧૫.૬ ॥

પદ્મેશપદપદ્મશ્રિત કૃત્યાંગં પદ્મજન્મનઃ ।
લાળિતા શિરસેશેન ગંગેવાશેષપાવની ॥ ૧૫.૭ ॥

નારાયણોऽનંતગુણો બ્રહ્માખ્યો વેદવેદિતઃ ।
વિશ્વકર્તેતિ વિશ્વજ્ઞઃ શ્રુત્યા યુક્ત્યાऽપ્યસીષધત ॥ ૧૫.૮ ॥

પ્રધાનમપરાધીનં કારણં પરિણામિ યત ।
પયોવદિતિ ચેત સાધ્યવૈકલ્યં સ્યાન્નિદર્ષને ॥ ૧૫.૯ ॥

વિવાદાધ્યાસિતા સૃષ્ટિશ્ચેતનેચ્ચાનુસારિણી ।
સૃષ્ટિત્વાત પટસૃષ્ટિર્વેત્યનુમા પક્ષસાધિકા ॥ ૧૫.૧૦ ॥

યચ્ચેતનાચેતનયોરંગાંગિત્વાદિ મન્વતે ।
સૃષ્ટાવીશાનપેક્ષાયાં તન્ન શોભનતાં વ્રજેત ॥ ૧૫.૧૧ ॥

સર્વવિન્નિર્મિતં સર્વં કદાચિત્કત્વહેતુતઃ ।
ન યદેવં નો તદેવં યથાऽત્મેતીશ્વરાનુમા ॥ ૧૫.૧૨ ॥

બલાય સર્વાનુમાનાં વેદાઃ સ્યુર્યૈરપાલિતાઃ ।
કામાદેતાઃ પ્રવર્તંતે કામિન્ય ઈવ ભર્તૃભિઃ ॥ ૧૫.૧૩ ॥

કારણં પરિણામિ સ્યાદ બ્રહ્મ નો ચેતનત્વતઃ ।

ન ચદિત્થં નો તદિત્થં ચથા ક્ષીરપુરસ્સરમ ॥ ૧૫.૧૪ ॥

ન વિષ્વકૃત પશુપતિઃ શ્રૂચમાણાગુણત્વતઃ ।
ચૈત્રવત કિં પુનર્વિધ્નબ્રધ્નાદ્યા બાલશંકિતાઃ ॥ ૧૫.૧૫ ॥

નનુ સૌખ્યાદિમાન નેશો દુઃખાદિરહિતત્વતઃ ।
ચો નૈવં સ્ચાત સ નૈવં સ્ચાદ ચથા સંસૃતિમાનિતિ ॥ ૧૫.૧૬ ॥

એવં ચેદ વિમતો જ્ઞાની ન ભ્રાંતિરહિતત્વતઃ ।
ચો નૈવં સ્ચાત સ નૈવં સ્ચાદ ભવીવેત્ચનુમીચતે ॥ ૧૫.૧૭ ॥

સર્વજ્ઞસ્ચાજ્ઞતાં વેદઃ શ્રદ્ધેચો વિરુણદ્ધિ ચેત ।
તસ્ચૈ વમાંદમાનંદં વદન્નાશ્રાવ્ચસૌ કથમ ॥ ૧૫.૧૮ ॥

દુઃખં પરિજિહીર્ષન ચઃ સુખં નોરીચિકીર્ષતિ ।
સ હંતાડપતિતં દુઃખમીશસ્ચ વ્ચસ્મરજ્જળઃ ॥ ૧૫.૧૯ ॥

ચો દુઃખસમવાચોડચં ચૈત્રેતેન હ્યભેદવાન ।
સમવાચઃ કશ્ચિદીશે તદનેકત્વમન્ચથા ॥ ૧૫.૨૦ ॥

ઔપાધિકોડસ્ચ ભેદશ્ચેત સત્ચોડસત્ચઃ સ્વિદુચ્ચતામ ।
તદ દ્વચં ચોકતદોષં હિ માચિવન્મા વદેત પરમ ॥ ૧૫.૨૧ ॥

બ્રૂયુરૌપાધિકં ભેદં જ્ઞાનાદીનાં યદાત્મનઃ ।
નીત્યાઽનયા તન્નિરાસાત સ્યાત તસ્યાનંતધર્મતા ॥ ૧૫.૨૨ ॥

ગુણાદિભેદે સંબંધમપેક્ષ્યાપ્યનવસ્થિતેઃ ।
વિશેષમાત્રેણાઽનંત્યં ગુણાનાં શોભતે વિભોઃ ॥ ૧૫.૨૩ ॥

મન્યંતે શૂન્યમેવાન્યે તત્વમાગમવૈરિણઃ ।
મતા માધ્યમિકાસ્તેઽપિ વ્યકતાશ્છન્ના ઈતિ દ્વયે ॥ ૧૫.૨૪ ॥

શૂન્યં બ્રહ્માહ્વયેનાઽહુઃ સ્વાંશ્ચ વેદાંતિનોઽભ્યધુઃ ।
અતત્વાવેદકં વેદં વદંતશ્ચરમે ખલાઃ ॥ ૧૫.૨૫ ॥

પરતત્વવિવર્તત્વાદપરસ્યાખિલસ્ય ચ ।
અવિશેષત્વતશ્ચાસ્ય નાંતરંતરમેતયોઃ ॥ ૧૫.૨૬ ॥

અખંડખંડનન્યાયાનખંડમપિ ખંડયન ।
અખંડયદખંડજ્ઞો દ્વયાંશ્ચાખંડલદ્વિષઃ ॥ ૧૫.૨૭ ॥

વિમતં કારણં ન સ્યાદસત્વાન્ન યદીદૃશમ ।
નેદૃશં તદ યથા કુંભકર્તેત્યત્રાનુમીયતે ॥ ૧૫.૨૮ ॥

અંધો તાપસ નો શૂન્યં કારણં કુંભકર્તૃવત ।
યત્સંવૃત્યુત્થિતં વિશ્વં તત કારણમિતીર્યતે ॥ ૧૫.૨૯ ॥

એવં ચેત કારણં મા સ્મ બ્રવીઃ શૂન્યં કથંચન ।
આયુષ્મંસ્તદધિષ્ઠાનં વ્યુત્પિત્સસ્વ ગુરોર્ગૃહે ॥ ૧૫.૩૦ ॥

વિવાદસ્ય પદં ન સ્યાદધિષ્ઠાનમસત્ત્વતઃ ।
વૈધર્મ્યેણૈષ દૃષ્ટાંતઃ શુક્ત્યાદિવદિતીર્યતે ॥ ૧૫.૩૧ ॥

અતત્ત્વાવેદકં માનમિતિ સ્વવ્યાહતં યતઃ ।
તદ્વાદી તેન વેદસ્ય સોઽભિપ્રૈત્યપ્રમાણતામ ॥ ૧૫.૩૨ ॥

યં તત્ત્વાવેદકં વેદ વેદાંશં વેદદૂષકઃ ।
તત્વસ્યાવર્ણનીયત્વાત સ તત્વાવેદકઃ કથમ ॥ ૧૫.૩૩ ॥

લક્ષણાભિઃ પ્રવર્તંતે વાક્યાનિ તિસૃભિર્યદિ ।
વિષયત્વં લક્ષણાનાં તસ્યૈવાનિષ્ટમાગતમ ॥ ૧૫.૩૪ ॥

કિંચાખંડેઽત્ર વાક્યાનિ કિંચિદ વિદધતે ન હિ ।
તાન્યભ્યધુરભાવં ચેજ્જાડ્યાદેસ્તન્ન શોભતે ॥ ૧૫.૩૫ ॥

અભાવભાવસ્યાભાવાદ ભાવરૂપસ્ય તસ્ય તુ ।
ભાવાભાવવિશેષાણામભાવાદવિશેષિણઃ ॥ ૧૫.૩૬ ॥

યો વેદવેદિતાર્થાનાં નિત્યસંત્યાગસંશ્રવી ।

વેદબાહ્યો વિપશ્ચિદ્ભિરેષ નિશ્ચીયતાં તતઃ ॥ ૧૫.૩૭ ॥

જ્યાયસો દૂષણેનૈવ ધૂર્તમ્મન્યોઽપિ દૂષિતઃ ।
પક્ષયોરવિશેષત્વાદનયોઃ સદ્વિપક્ષયોઃ ॥ ૧૫.૩૮ ॥

અસત્વાદિત્યસૌ હેતુરસિદ્ધો બ્રહ્મવાદિનઃ ।
મેતિ ભાણ્યવિશેષત્વાદેતયોર્બ્રહ્મશૂન્યયોઃ ॥ ૧૫.૩૯ ॥

સોઽઙ્ગીકરોતિ ચેત સત્ત્વં બ્રહ્મણઃ સ્યાદ વિશેષિતા ।
ન ચેત પ્રાપ્તં પારિશેષ્યાદસત્ત્વં ન નિરસ્યતુ ॥ ૧૫.૪૦ ॥

વિગીતં ન વિચાર્યં સ્યાત ન ભાવ્યં ન ફલપ્રદમ ।
શૂન્યં બ્રહ્માદ્યમદ્વૈતં વિધિધીગોચરો ન યત ॥ ૧૫.૪૧ ॥

ખપુષ્પવદખંડત્વાદ વ્યતિરિક્તં નિદર્શનમ ।
પ્રમાણાદિવદિત્યેવમૂહનીયં યથેપ્સિતમ ॥ ૧૫.૪૨ ॥

આમ્નાયાનામમાનત્વે ધર્માદિરપ્રમાણતા ।
ધર્માદ્યભાવે નો માનં પ્રત્યક્ષૈકપ્રમાણિનઃ ॥ ૧૫.૪૩ ॥

ન પૌરુષેયં વચનં પ્રામાણ્યેન વિનિશ્ચિતમ ।
પૌરુષેયત્વતો યદ્વદ વાક્યમુન્મત્તભાષિતમ ॥ ૧૫.૪૪ ॥

વિમતઃ પુરુષોઽજ્ઞઃ સ્યાત સ્યાચ્ચાસૌ વિપ્રલંભકઃ ।
પુંસ્ત્વાચ્ચૈત્રવદિત્યસ્તા સર્વજ્ઞે કેવલાનુમા ॥ ૧૫.૪૫ ॥

દુઃખાકરોતિ યદ દૈવં દુઃશાસ્ત્રેષૂગ્ર આગ્રહઃ ।
દુઃખાકરોઽતિઘોરઃ સ્યાલ્લોકોઽતસ્તદ્ધતાં ધ્રુવઃ ॥ ૧૫.૪૬ ॥

આસ્માકેઽપેક્ષિતે પક્ષે મોક્ષં દદ્યાદધોક્ષજઃ ।
યત્ર સ્વાનંદિનઃ સંતઃ સેવંતે વિષયાન બહૂન ॥ ૧૫.૪૭ ॥

સ્વવ્યાહત્યાદિનોપેક્ષ્યા મુક્તિર્યા નિર્વિશેષિતા ।
કદેત્યાદ્યનુયોગેઽસ્યા વિશેષઃ સ્યાન્નનૂત્તરે ॥ ૧૫.૪૮ ॥

અપિ બુદ્ધ્યાદિરહિતઃ પુરુષાર્થી ન સર્વથા ।
નિખિલાનુભવાભાવાત પુત્તળીકાપુરોગવત ॥ ૧૫.૪૯ ॥

જ્ઞાનપ્રયત્નવાંછાવાનીશો ન હ્યશુભં ભજેત ।
સ્વસામર્થ્યેન તેનૈવં તં ચ કુર્યાત સ તાદૃશમ ॥ ૧૫.૫૦ ॥

દુઃખવ્યાપ્તં સુખં બદ્ધે દૃષ્ટ્વા મુકતે નિરસ્યતા ।
સ્વરૂપં ચ નિરસ્યેત શૂન્યવાદી તદા ભવેત ॥ ૧૫.૫૧ ॥

નનુ વિપ્રતિપન્નઃ સ્યાદૂર્મિમાન દેહવત્ત્વતઃ ।
ચૈત્રો યથેત્યુપાધિઃ સ્યાત તત્ર યાશુદ્ધદેહિતા ॥ ૧૫.૫૨ ॥

અનૈકાંતિકતા હેતોર્દેહવત્ત્વાદધીશિતુઃ ।
સોऽદેહશ્ચેદનિચ્છાદિર્ભવેચ્છશવિષાણવત ॥ ૧૫.૫૩ ॥

જ્ઞાત્રાદિરૂપમસ્ય સ્યાદ વૈલક્ષણ્યાચ ચેત તતઃ ।
તદેવ દેહશબ્દોકતં ન હ્યસૌ પ્રાકૃતાકૃતિઃ ॥ ૧૫.૫૪ ॥

એવં સ્વરૂપદેહત્વં મુકતસ્યાપ્યુરરીકૃતમ ।
નાનિષ્ટભોગસ્તેન સ્યાત પ્રાકૃતક્ષેત્રસંભવઃ ॥ ૧૫.૫૫ ॥

વિમતો નાવચવવાન વિનાશિત્વપ્રસંગતઃ ।
પટવચ્ચેદવચવા નિરસ્યંતેऽત્ર કીદૃશાઃ ॥ ૧૫.૫૬ ॥

સિદ્ધસાધનતા હેતોસ્તે ભિન્નાશ્ચેદચિન્મચાઃ ।
આત્મનો ભેદરહિતા એષ્ટવ્યા એવ વાદિભિઃ ॥ ૧૫.૫૭ ॥

પરમાણ્વાદિદેશેષુ વ્યાપ્ત્યૈ વ્યામાદિકેષ્વપિ ।
ચથાऽऽત્મનઃ પ્રદેશાઃ સ્યુસ્તેષાં નોऽવચવાસ્તથા ॥ ૧૫.૫૮ ॥

મુકતો રૂપાદિવિત સત્વાજ્જડાન્યત્વે સતીશવત ।
દૃષ્ટાંતોऽસાધ્યવિકલસ્તસ્ય સર્વજ્ઞતાગ્રહાત ॥ ૧૫.૫૯ ॥

ઈશ્વરો ન સુખી તેન રૂપાદ્યનુભવન્નપિ ।

દુઃખપ્રસંગાદિતિ મા વાદિ તદ્વ્યાપ્તિદૂષણાત ॥ ૧૫.૬૦ ॥

દૃષ્ટાંતો યસ્ય નેષ્ટોયં તસ્ય સ્યાદ વ્યતિરેકવાન ।
શિલાવદિત્યતઃ શુદ્ધચિદ્દેહેંદ્રિયભોગ્યસૌ ॥ ૧૫.૬૧ ॥

સ્વાનંદવિષયે મોક્ષે વેદોકતે યુક્તિસાધિતે ।
દ્વેષોઽયં વાદિનાં કસ્માત તદ્વિરુદ્ધેઽથવાઽઽગ્રહઃ ॥ ૧૫.૬૨ ॥

તતઃ સ્વતઃ પ્રમાણેન દેવો વેદેન વેદિતઃ ।
વિષ્ણુર્મોક્ષસ્ય દાતેતિ વિશ્વં ભવતિ શોભનમ ॥ ૧૫.૬૩ ॥

ઈત્યાદીન દર્શયંત્યર્થાન વ્યાખ્યોપન્યાસસંયુતા ।
ત્રિવિક્રમાર્યેણ તદા વિશ્વાભિજ્ઞસ્ય શુશ્રુવે ॥ ૧૫.૬૪ ॥

અથ પ્રાયુંક્ત વિવિધાન બોધચાપગુણેરિતાન ।
વિપક્ષયુકતાન વીર્યેણ તીક્ષ્ણાંસ્તર્કશરાનસૌ ॥ ૧૫.૬૫ ॥

ચિચ્છેદાતુચ્છધિષણસ્તાંસ્તદા તર્કસાયકૈઃ ।
પ્રયુકતમાત્રાન પ્રહસન લીલયાઽતિશયાલુભિઃ ॥ ૧૫.૬૬ ॥

અધાર્યાણીતરજનૈરનિવર્ત્યાનિ પૂરુષૈઃ ।
વિજિગીષુર્દ્વિજશ્રેષ્ઠો વેદાસ્ત્રાણિ પ્રયુકતવાન ॥ ૧૫.૬૭ ॥

વાક્યૈરતિબલીયોભિઃ પ્રત્યસ્ત્રૈરિવ વૈદિકૈઃ ।
અર્થાંતરં પ્રકટયન તાન્યસૌ સન્ન્યવર્તયત ॥ ૧૫.૬૮ ॥

સપ્તાષ્ટાનિ દિનાન્યેવં વાદં કૃત્વા સહામુના ।
નિરુત્તરં ચ નિશ્ચોદ્યં ચક્રે ચક્રાયુધપ્રિયઃ ॥ ૧૫.૬૯ ॥

પ્રણમ્યાઽયષ્ટ શિષ્ટોઽસૌ ક્ષમ્યતાં નાથ ચાપલમ ।
પદપદ્મરજોદાસ્યં ધ્રુવં મે દીયતામિતિ ॥ ૧૫.૭૦ ॥

વ્યાખ્યાં ભાષ્યસ્ય ભૂયોધીઃ શ્રવણં સૂરિનંદનઃ ।
સંતઃ પ્રીતિમસંતોઽન્યાં સમમારેભિરે તતઃ ॥ ૧૫.૭૧ ॥

ગુર્વાજ્ઞાગૌરવાટ્ટીકાં કુર્વન ભાષ્યસ્ય દુષ્કરામ ।
ષડર્ધવિક્રમાર્યોસૌ મહાચાર્યમભાષત ॥ ૧૫.૭૨ ॥

કવીંદ્રૈર્ન સમાપ્યંતે સંગૃહ્યાપિ યતોઽનિશમ ।
ન્યાયરત્નાનિ ભાષ્યાબ્ધેરસ્ય ગાંભીર્યમદ્ભુતમ ॥ ૧૫.૭૩ ॥

દશોપનિષદો દેવીઃ દેવા ઈવ સમીપ્સિતાઃ ।
યુકતાઃ પ્રસાદયંત્યર્થા એષુ ભાષ્યાલયેષ્વલમ ॥ ૧૫.૭૪ ॥

ગીતાતાત્પર્યભાષ્યાભ્યામાભ્યાં વિશ્વં પ્રકાશ્યતે ।
ગોગણૈરપ્રતીકારૈરર્કેંદુભ્યામિવાધિકમ ॥ ૧૫.૭૫ ॥

ઈતિહાસપુરાણાબ્ધેર્ભવચ્ચિત્તાદ્રિલોળિતાત ।
જાતાં ભારતતાત્પર્યસુધાં કઃ સન્ન સેવતે ॥ ૧૫.૭૬ ॥

પુરાણસ્થાનપાંથાનામભાષાત્રયવેદિનામ ।
ભવતા સુસખા ચક્રે શ્રીભાગવતનિર્ણયઃ ॥ ૧૫.૭૭ ॥

કસ્તંત્રસારં સંપ્રાપ્ય ન સ્યાત પર્યાપ્તવાંછિતઃ ।
અમરૈરાશ્રિતચ્છાયં કલ્પદ્રુમમિવોત્તમમ ॥ ૧૫.૭૮ ॥

લોકાનામવલોકાય માર્ગસ્યાસ્ય વ્યધાદ ભવાન ।
કરુણાકર નેત્રાભે વાદસન્માનલક્ષણે ॥ ૧૫.૭૯ ॥

એકાકી કિલ ચશ્ચક્રે પદં મૌલિષુ વિદ્વિષામ ।
તત્વનિર્ણયપાર્થોઽયં કેન નામ ન પૂજ્યતે ॥ ૧૫.૮૦ ॥

વાદાદયઃ પ્રકરણસ્ફુલિંગાસ્તનવોઽપ્યલમ ।
વિપક્ષકક્ષં ક્ષિણ્વંતિ મારુતેન ત્વયેરિતાઃ ॥ ૧૫.૮૧ ॥

અનંતોઽર્થઃ પ્રકટિતસ્ત્વયાઽણૌ ભાષ્યસંગ્રહે ।
અહો આત્મપરિજ્ઞપ્ત્યૈ કૃષ્ણેનેવાઽનનાંતરે ॥ ૧૫.૮૨ ॥

ભગવંશ્ચિત્રકવિતાં લૌકિકીં દર્શયન કિલ ।

ગોપ્યં ભારતસંક્ષેપમકૃથા વિશ્વવિસ્મયમ ॥ ૧૫.૮૩ ॥

નાનાસુભાષિતસ્તોત્રગાથાદિકૃતિસત્કૃતીઃ ।
ત્વયિ રત્નાકરે રત્નશ્રેણીર્વા ગણયંતિ કે ॥ ૧૫.૮૪ ॥

એષુ દભ્રમતીન દભ્રાન હસત્યુચ્ચૈઃ સતાં સભા ।
ચિંતામણીંશ્ચિંતયંતી મિતાનપ્યમિતાર્થદાન ॥ ૧૫.૮૫ ॥

અપરેઽપીષ્યતેઽસ્માભિર્ગ્રંથેષ્વેતેષુ સત્સ્વપિ ।
સત્સ્વપીંદ્રાદિષુ પુરા તારકારિરિવામરૈઃ ॥ ૧૫.૮૬ ॥

ગ્રંથેભ્ય એભ્યોઽગાધેભ્યો યુક્તયો નો દુરુદ્ધરાઃ ।
મનોમાંધાત તતો ગ્રંથં વ્યક્તતર્કતતિં કુરુ ॥ ૧૫.૮૭ ॥

ઈત્યર્થિતો વ્યધાન્મધ્વઃ સોઽનુવ્યાખ્યાં સતાં સુધામ ।
દુર્વાદિગર્વાદ્રિપવિં માયિધ્વાંતરવિદ્યુતિમ ॥ ૧૫.૮૮ ॥

યુગપદ રચયન્નેનાં કદાચિત સ નિરંતરમ ।
ચતુરશ્ચતુરઃ શિષ્યાન લીલયાઽલેખયત ખલુ ॥ ૧૫.૮૯ ॥

યુક્તાયા યુક્તિમાલાયાઃ પ્રોક્તાયાસ્તત્ર યાઽત્મના ।
વ્યક્તં ચક્રે વિવરણં કવીંદ્રૈરેષ દુષ્કરમ ॥ ૧૫.૯૦ ॥

મધ્વેંદોર્નિત્યસંબંધાત નિસ્તમસ્તાપચેતસોઃ ।
વૈકુંઠં યાતયોઃ પિત્રોઃ ગેહેઽસ્યાવરજોઽવસત ॥ ૧૫.૯૧ ॥

વિધિભ્રૂવિભ્રમભ્રશ્યદ્ધનગોધાન્યસંપદા ।
નિર્વેદિના વેદવિદા તેનાઽપે વેદવાદિરાટ ॥ ૧૫.૯૨ ॥

પારિવ્રાજ્યં પ્રાર્થયંતં પાદાનમ્રમિમં મુહુઃ ।
સમયાપેક્ષયોર્વીક્ષ્યો ગમયામાસ ધામ તમ ॥ ૧૫.૯૩ ॥

ન જઘાસ ન સુષ્વાપ ન જહાસ સ ધીરધીઃ ।
સમયાર્થી સ્મરન જ્યેષ્ઠં રામં રામાનુજો યથા ॥ ૧૫.૯૪ ॥

રાજ્યે કથંચિત સંસ્થાપ્ય રાજાનં વિરહાર્દિતમ ।
અવતારભુવં પ્રાયાદ ભગવાન શરદત્યયે ॥ ૧૫.૯૫ ॥

વિશુદ્ધદ્વિકુલં શ્રૌતં શુચિં કૃતપિતૃક્રિયમ ।
વિરક્તં વિષયાન ભુક્ત્વા વ્યધાન્મધ્વોઽનુજં યતિમ ॥ ૧૫.૯૬ ॥

રહસ્યતિરહસ્યં તદ બ્રહ્મ બ્રહ્મસમો દદૌ ।
અમુષ્મૈ પંચતપસો ન વિદુર્યત તપસ્વિનઃ ॥ ૧૫.૯૭ ॥

પ્રેમામૃતપ્રસન્નાસ્યસ્મિતાંગાપાંગપૂર્વકમ ।
શ્રીવિષ્ણુતીર્થનામાસ્મૈ પ્રીતિતીર્થઃ પ્રદત્તવાન ॥ ૧૫.૯૮ ॥

શ્રવણેનાનુવાદેન મનનેનાવૃથાऽકરોત ।
કાલં વેદાંતશાસ્ત્રસ્ય વેદાંતગુરુસોદરઃ ॥ ૧૫.૯૯ ॥

સ દાંતિભક્તિમાધુર્યપરિચર્યાદિમેદુરૈઃ ।
મહાવિટપિનં ચક્રે ગુરોઃ સ્વસ્થં કૃપાંકુરમ ॥ ૧૫.૧૦૦ ॥

અનંતમતિકારુણ્યકલ્પદ્રુમવતો જનૈઃ ।
અવર્ણ્યો મહિમા તસ્ય લૌલ્યાત સંવર્ણ્યતે મનાક ॥ ૧૫.૧૦૧ ॥

ચતુરેऽસૌ પ્રવચને મનુસંસિદ્ધિમાન મનઃ ।
સંખ્યા માં પૂરણી મા ગાન્મધ્વદાસમિતિ વ્યધાત ॥ ૧૫.૧૦૨ ॥

દિશં પ્રચાતં શશિનશ્ચરંતં પર્યશોધયત ।
તીર્થકં વિષ્ણુતીર્થં ચ વિષ્ણુતીર્થસ્ય તીર્થકમ ॥ ૧૫.૧૦૩ ॥

અકામાનામનેકેષાં સિદ્ધિભૂમિં તપસ્વિનામ ।
તિરોહિતાત્મા પ્રાપાસૌ હરિશ્ચંદ્રમહીધરમ ॥ ૧૫.૧૦૪ ॥

દ્વંદ્વદુઃખાનલે વીરો માત્સર્યેણ વિમત્સરઃ ।
તત્યાજ મત્વા તસ્યાસાવશનાદીંધનાચિતમ ॥ ૧૫.૧૦૫ ॥

ભક્તૈરનુગિરં નીતં પ્રાર્થિતો યતિશેખરઃ ।

પંચગવ્યં પપૌ કિંચિત પંચમેપંચમે દિને ॥ ૧૫.૧૦૬ ॥

સ ત્યજન સાહસી તચ્ચ તપસ્તેપેઽતિતાપસમ ।
બિલ્વપર્ણૈઃ ક્શિતૌ પન્નૈસ્તૃપ્તિમાન સલિલૈરપિ ॥ ૧૫.૧૦૭ ॥

યથેષ્ટમધ્યાસ્ત શિલાં યમી સુનિયમી સ તામ ।
નાઽધ્યાસતે યામેકાહં દૈવભગ્નાસ્તપસ્વિનઃ ॥ ૧૫.૧૦૮ ॥

પવનાંશાનુજો જિત્વા પવનં રેચકાદિભિઃ ।
વિષયેભ્યો હૃષીકાશ્વાન મનોયંત્રા સમાહરત ॥ ૧૫.૧૦૯ ॥

સ્મરન મુરારેરાકારં દધ્યાવધ્યાત્મકોવિદઃ ।
સમાધિમાધિશમનં યોગિલભ્યં સ લબ્ધવાન ॥ ૧૫.૧૧૦ ॥

મૌકુંદે સુંદરે રૂપે સ્વાનંદાદિગુણાર્ણવે ।
સ્વાશ્ચર્યરત્ને મગ્નાત્મા નાન્યત કિંચિદ વિવેદ સઃ ॥ ૧૫.૧૧૧ ॥

કામત્રાસવિહીનસ્ય તસ્ય સુજ્ઞાનચક્ષુષઃ ।
વિના કૈવલ્યસામ્રાજ્યં નાર્ઘો યોગમણીરભૂત ॥ ૧૫.૧૧૨ ॥

મધ્વાનુજે મધ્વનાથો યં પ્રસાદં વ્યધાત તદા ।

સ ચિત્તાવિષચત્વાદ વા ગોપ્યત્વાદ વા ન વર્ણ્યતે ॥ ૧૫.૧૧૩ ॥

અહો મહાબોધસેવામહિમાઽસ્મિન યુગે યતઃ ।
ધન્યોઽસૌ સિદ્ધિમાપેમાં સોઽમરૈરિત્યલાળ્યત ॥ ૧૫.૧૧૪ ॥

તીવ્રવ્રતોઽતીંદ્રિયવિદ વિદ્યાબ્ધિસ્તર્કપંડિતઃ ।
અનિરુદ્ધપદાધારઃ પ્રેષ્ઠઃ શિષ્યસ્તમાયયૌ ॥ ૧૫.૧૧૫ ॥

તેન સંપ્રાર્થિતં યાતં રૂપ્યપીઠમિમં પુનઃ ।
કૃત્સ્નજ્ઞં કૃપયા સ્વેષુ સંપ્રાપ્તં મેનિરે પ્રજાઃ ॥ ૧૫.૧૧૬ ॥

કવીંદ્રતિલકો વિદ્વચ્છેખરસ્તાપસાગ્રણીઃ ।
મધ્વકેળીશુકોઽસ્યાભૂ ચ્છિષ્યો વ્યાસપદાશ્રયઃ ॥ ૧૫.૧૧૭ ॥

અસૌ દાસ્યં ધ્રુવં યાતં મહાંતં મહતામપિ ।
વ્યધાદનુગ્રહં કુર્વન સામર્થ્યૈઃ કૌતુકં નૃણામ ॥ ૧૫.૧૧૮ ॥

આરુરોહ દુરારોહં સ પરૈઃ પ્રીતિકૃદ્ધરેઃ ।
મહાંતં મહિમાનં ચ મહીધ્રં ચ ગુહપ્રિયમ ॥ ૧૫.૧૧૯ ॥

આકૃષ્ટોઽસ્ય ગુણૈર્વ્યાપ્તૈઃ યો ગોદાયા ઉપાયયૌ ।
સ પદ્મનાભતીર્થાખ્યઃ શિષ્યોઽન્યોઽભૂત સુચેતસઃ ॥ ૧૫.૧૨૦ ॥

શ્રુત્યા મત્યા સદા ભક્ત્યા વિરક્ત્યા નિત્યસેવયા ।
યસ્મૈ પ્રસન્નઃ પ્રાજ્યેક્ષઃ સદ્યો વિદ્યાં દદૌ શુભામ ॥ ૧૫.૧૨૧ ॥

વેદાંતાબ્ધિં ન યો જાતુ જહૌ વિદ્વત્તિમિંગિલઃ ।
યુક્તિપ્રવાહસંરંભાત પરશાસ્ત્રનદીચરઃ ॥ ૧૫.૧૨૨ ॥

વ્યાખ્યાપ્રણાદમાત્રેણ વીરં મન્યાન સ્વમંડલે ।
માયાવિગ્રામસિંહાન યો વાદિસિંહો નિરાકરોત ॥ ૧૫.૧૨૩ ॥

મત્તદુર્વાદિમાતંગતર્કમસ્તકદારણે ।
પંચાસ્યો યોઽભવદ વ્યક્તં ચતુરાસ્યોઽપિ કેવલમ ॥ ૧૫.૧૨૪ ॥

સન્ન્યાયરત્નાવળિરપ્યુદપાદિ યતઃ પરા ।
ટીકાઽપરાઽનુવ્યાખ્યાયા અનર્ઘા બોધસાગરાત ॥ ૧૫.૧૨૫ ॥

વેદપ્રવચનાચાર્યશિષ્યોઽસાવિતિ પૂજિતઃ ।
સભ્યઃ સભાયાં યો વેદં વ્યાચખ્યૌ વેદસારવિત ॥ ૧૫.૧૨૬ ॥

અનયોઃ પ્રથમે શિષ્યાશ્ચરમે ચાભવન્નિહ ।
અનંતબોધસ્યાનેકે યતીંદ્રા બહુદેશજાઃ ॥ ૧૫.૧૨૭ ॥

વશીકૃતહૃષીકાશ્ચ જનનાદ્યુપમર્દિનઃ ।
નરસિંહપદાધારા અભ્યસ્તોપેંદ્રનામકાઃ ॥ ૧૫.૧૨૮ ॥

અદીર્ઘાન્યાભિધાના યે શ્રીમદ્રામપદાશ્રયાઃ ।
અપ્રત્યકશગુણોદ્રિક્તા ભક્તિવૈરાગ્યસાગરાઃ ॥ ૧૫.૧૨૯ ॥

પાદૈઃ પુનંતઃ પૃથિવીં દર્શયંતો હરેઃ પદમ ।
ધૂતદુસ્સમયધ્વાંતા ભાસ્કરા ઈવ ગાં ગતાઃ ॥ ૧૫.૧૩૦ ॥

મોક્ષશાસ્ત્રામૃતાંભોધિસેવયા નિત્યનિર્વૃતાઃ ।
યક્રિયારુતરાર્યાસુ યક્રિણષ્યરણાર્યકાઃ ॥ ૧૫.૧૩૧ ॥

મધ્વપ્રશિષ્યા બહવઃ શિષ્યા એષાં મુહુસ્તથા ।
અલંચક્રુરલં પૃથ્વીં સર્વે સદ્ગુણભૂષણાઃ ॥ ૧૫.૧૩૨ ॥

સદા સકલસચ્છાસ્ત્રવ્યાખ્યાસૌખ્યામૃતાબ્ધિગાઃ ।
સર્વે દુર્વાદિદુર્વાદકાંડખંડનમંડનાઃ ॥ ૧૫.૧૩૩ ॥

ભૂરિભક્તિભરાઃ કેચિદેષ્વલ્પશ્રુતસંપદઃ ।
અપ્યલ્પબોધા અપરે બહુશ્રુતમહાગુણાઃ ॥ ૧૫.૧૩૪ ॥

બહવો ગૃહિણોઽપ્યસ્માત સમગ્રાનુગ્રહં યયુઃ ।
દીપ્રા યત્રાગ્નય ઈવ ત્રયો લિકુયશેખરાઃ ॥ ૧૫.૧૩૫ ॥

માધ્વં નિયોગં યે પ્રાયો નાત્યજન વિદુષાં વરાઃ ।

શિષ્યક્ષેત્રેષુ સદ્વિદ્યાબીજાવાપૈકદીક્ષિતાઃ ॥ ૧૫.૧૩૬ ॥

ગ્રામણ્યો બ્રાહ્મણાગ્રણ્યઃ પ્રાપુઃ પૂર્ણેક્ષશિષ્યતામ ।
યેષાં સદ્બુપ્તિમાત્રેણ ભવેત કિલ પરં પદમ ॥ ૧૫.૧૩૭ ॥

શુશ્રૂષાપક્ષપાતાદ્યૈઃ કેભ્યશ્ચિત કેવલં દદૌ ।
રામપ્રિયો રામ ઈવ સ્વાં ગતિં યોગિદુર્લભામ ॥ ૧૫.૧૩૮ ॥

શિષ્યપ્રશિષ્યાતિશયા ઈદૃશા યદ્યોદયાત ।
કો નેચ્છેત સુલભં ભક્ત્યા તત્પાદસુરપાદપમ ॥ ૧૫.૧૩૯ ॥

ઈત્થં સદ્ભિઃ સદ્ભિરર્ચ્યો ધરાયાં ચક્રે વાસં શેષશય્યે શયાને ।
ગ્રામે વાતૈઃ પાવિતે કાણ્વતીર્થૈઃ ભક્તપ્રીત્યા સન્મઠેઽનૂનબોધઃ ॥ ૧૫.૧૪૦
॥

આનંદતીર્થભગવદ્વદનેંદુબિંબં
વિદ્યાસુધાવિતતકાંતિ સુકાંતિકાંતમ ।
યૈઃ પ્રૈક્ષ્યતાત્ર ભવતાપશમાય ભક્તૈઃ
તદ્દાસદાસ્યમપિ કિં ન દદાતિ પુંસઃ ॥ ૧૫.૧૪૧ ॥

॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત
શ્રીનારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે પંચાદશઃ સર્ગઃ ॥